# श्री वैकृतिका रहस्यं

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता । सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते || १ ||
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा । मधुकैटभनाशार्थं यां तुष्टावाम्बुजासन: || २ ||

दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा । विशालया राजमाना त्रिंशल्लोचन मालया || ३ ||
स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप । रूपसौभाग्य कान्तीनां सा प्रतिष्ठा महाश्रिय: || ४ ||

खड्ग बाण गदा शूल चक्र शङ्खभुशुण्डिभृत् । परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ || ५ ||
एषा सा वैष्णवी माया महाकाली दुरत्यया । आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् || ६ ||

सर्वदेवशरीरेभ्यो या विर्भूतामितप्रभा । त्रिगुणा सा महालक्ष्मी: साक्षान्महिषमर्दिनी || ७ ||
श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला । रक्त मध्या रक्त पादा नीलजङ्घोरुरुन्मदा || ८ ||

सुचित्रजघना चित्रमाल्याम्बरविभूषणा । चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी || ९ ||
अष्टादश भुजा पूज्या सा सहस्त्रभुजा सती । आयुधान्यत्र वक्ष्यन्ते दक्षिणाध:करक्रमात् || १० ||

अक्षमाला च कमलं बाणोऽसि: कुलिशं गदा । चक्रं त्रिशूलं परशु: शङ्खो घण्टा च पाशक: || ११ ||
शक्ति र्दण्डश्चर्म चापं पानपात्रं कमण्डलु: । अलंकृत भुजामेभि रायुधै: कमलासनाम् || १२ ||

सर्वदेव मयीमीशां महालक्ष्मी मियां नृप । पूजये त्सर्व लोकानां स देवानां प्रभुर्भवेत् || १३ ||
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया । साक्षा त्सरस्वती प्रोक्त शुम्भासुर निबर्हिणी || १४ ||

दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् । शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप || १५ ||
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति । निशुम्भ मथिनी देवी शुम्भासुर निबर्हिणी || १६ ||

इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव । उपासनं जगन्मातु: पृथगासां निशामय || १७ ||
महालक्ष्मी र्यदा पूज्या महाकाली सरस्वती । दक्षिणोत्तरयो: पूज्ये पृष्ठतो मिथुनत्रयम् || १८ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

विरञ्चि: स्वरया मध्ये रुद्रो गौर्या च दक्षिणे । वामे लक्ष्म्या हृषीकेश: पुरतो देवतात्रयम् || १९ ||
अष्टादश भुजा मध्ये वामे चास्या दशानना । दक्षिणेऽष्ट भुजा लक्ष्मीर्महतीति समर्चयेत् || २० ||

अष्टादश भुजा चैषा यदा पूज्या नराधिप । दशानना चाष्टभुजा दक्षिणोत्तरयो स्तदा || २१ ||
कालमृत्यू च सम्पूज्यौ सर्वारिष्ट प्रशान्तये । यदा चाष्टभुजा पूज्या शुम्भासुर निबर्हिणी || २२ ||

नवास्या: शक्त य: पूज्यास्तदा रुद्रविनायकौ । नमो देव्या इति स्तोत्रै र्महालक्ष्मीं समर्चयेत् || २३ ||
अवतारत्रयार्चायां स्तोत्र मन्त्रा स्तदा श्रया: । अष्टादश भुजा सैव पूज्या महिषमर्दिनी || २४ ||

महालक्ष्मी र्महाकाली सैव प्रोक्ता सरस्वती । ईश्वरी पुण्यपापानां सर्वलोक महेश्वरी || २५ ||
महिषान्तकरी येन पूजिता स जगत्प्रभु: । पूजये ज्जगतां धात्रीं चण्डिकां भक्त वत्सलाम् || २६ ||

अघ्र्यादिभि रलंकारै र्गन्ध पुष्पै स्तथाक्षतै: । धूपैर्दीपैश्च नैवेद्यै र्नानाभक्ष्य समन्वितै: || २७ ||
रुधिराक्ते न बलिना मांसेन सुरया नृप । प्रणामाचमनीयेन चन्दनेन सुगन्धिना || २८ ||

सकर्पूरैश्च ताम्बूलै र्भक्ति भाव समन्वितै: । वामभागेग्रतो देव्या श्छिन्नशीर्ष महासुरम् || २९ ||
पूजये न्महिषं येन प्राप्तं सायुज्यमीशया । दक्षिणे पुरत: सिंहं समग्रं धर्ममीश्वरम् || ३० ||

वाहनं पूजयेद्देव्या धृतं येन चराचरम् । कुर्याच्च स्तवनं धीमांस्तस्या एकाग्रमानस: || ३१ ||
तत: कृताञ्जलि र्भूत्वा स्तुवीत चरितैरिमै: । एकेन वा मध्यमेन नैकेनेतरयोरिह || ३२ ||

चरितार्धं तु न जपेज्जपन्छिद्र मवापनुयात् ।
प्रदक्षिणा नमस्कारान् कृत्वा मूधिनर् कृताञ्जलि: || ३३ ||
क्षमापये ज्जगद्धात्रीं मुहुर्मुहुरतन्द्रित: ।
प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा || ३४ ||

जुहुया त्स्तोत्र मन्त्रैर्वा चण्डिकायै शुभं हवि: । भूयो नामपदैर्देवीं पूजये त्सुसमाहित: || ३५ ||
प्रयत: प्राञ्जलि: प्रह्व: प्रणम्यारोप्य चात्मनि । सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् || ३६ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

एवं य: पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ।
भुक्त्वा भोगान् यथाकामं देवीसायुज्य माप्नुयात् || ३७ ||
यो न पूजयते नित्यं चण्डिकां भक्त वत्सलाम् ।
भस्मी कृत्यास्य पुण्यानि निर्दहे त्परमेश्वरी || ३८ ||

तस्मा त्पूजय भूपाल सर्वलोक महेश्वरीम् ।
यथोक्ते न विधानेन चण्डिकां सुखमाप्स्यसि || ३९ ||

**इति श्री वैकृतिका रहस्यम सम्पूर्ण**




With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org